दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्दः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् माघशुक्लप्रतिपदा
माघ 06 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-88 | 1 | जनवरी 19, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 स्वास्थ्यक्षेत्रे क्रान्तिकारी-परिवर्तनं भविष्यति, राज्यं च वर्षत्रये देशे प्रथमस्थाने भविष्यति- मुख्यमंत्री सुक्खुः

4 कलियाचकविक्रमकिशोर-आदर्श-संस्कृतमहाविद्यालयः संस्कृतभारती इत्यनयोः यौथप्रयासेन आयोजितः निःशुल्कदशदिवसीयः संस्कृत- सम्भाषणवर्गस्य समापनसमारोहः

6 लेखाः परिवारः अस्माकं संस्कारशाला संस्कृतभाषा संरक्षणीया लोके

## प्रधानमन्त्रिणा नरेन्द्रमोदिना असम-बङ्गाल राज्ययोः सप्त-सहस्र-कोटितोप्यधिकरूप्यकाणां बहुविध-परियोजनानां शिलान्यासः कृतः



**हिमसंस्कृतवार्ताः** - प्रधानमन्त्रिणा नरेन्द्रमोदिना असम-राज्यस्य नागांव-जनपदस्य कालियाबोरे सार्द्ध-नवशताधिक-षड्सहस्रकोटिरूप्यकाणां शिलान्यासः कृतः। सः अवदत् यत् षड्शीति-किलोमीटर सुदीर्घ-काजीरङ्गा-एलिवेटेड-कॉरिडोर-प्रकल्पः पर्यावरणानुरूपं राष्ट्रिय राजमार्ग-प्रकल्पः अस्ति। अस्मिन् पञ्चत्रिंशत् किलोमीटर यावत् उन्नतः वन्यजीव-मार्गः भविष्यति, यत् काजीरङ्गा-राष्ट्रिय-उद्यानस्य मध्यक्षेत्रात् गमिष्यति। परियोजनायाः उद्देश्यं उद्यानस्य समृद्ध-जैवविविधतायाः संरक्षणेन सुनिश्चितेन सह क्षेत्रीय-सम्पर्कस्य अभिवृद्धिः अस्ति। एषा परियोजना नागांव, कार्वी, आंगलोंग, गोलाघाट इत्येतेषु मण्डलेषु गमिष्यति, सहैव उच्च-असम-प्रदेशस्य विशेषतः डिब्रूगढ़, तिन्सुकिया इत्येतैः क्षेत्रैः सह सम्पर्क वर्धिष्यति। उन्नत वन्यजीव-मार्गः पशूनां अविराम-आवागमनं सुनिश्चीय मानव-वन्यजीव-संघर्षं न्यूनीकर्तुं शक्नोति । कालियाबोरनगरे विकासकार्यस्य उद्घाटने भाषमाणः श्रीमोदी अवदत् यत् काजीरङ्गा न केवलं राष्ट्रियोद्यानम् अपितु असम-राज्यस्य आत्मा अस्ति।

### यूनेस्को संस्थया काजीरङ्गा विश्व रिक्थ-स्थलत्वेन स्वीकृतम्- प्रधानमन्त्री

प्रधानमन्त्रिणा असम-राज्यस्य नांगाव-जनपदस्य कालियाबोर नगरे नूतनयोः अमृतभारत-एक्स्प्रेस-रेलयानयोः हरितध्वजं प्रदर्शितम्। कामाख्या-रोहतक-अमृतभारत एक्स्प्रेस, डिब्रूगढ़-लखनऊ (गोमतीनगरम्) अमृतभारत एक्स्प्रेस चरेलयाने स्तः । यूनेस्को संस्थया काजीरङ्गा-प्रदेशं विश्व रिक्थ-स्थलत्वेन स्वीकृतम् इति प्रधानमन्त्रिणा सूचितम्। प्रधानमन्त्रिणा नरेन्द्रमोदिना पश्चिमबङ्गालराज्यस्य हुगली-मण्डलस्य सिङ्गुर-नगरे त्रिंशोत्तर अष्टशत कोटिरूप्यकाणां बहुविध-विकास-परियोजनानां उद्घाटनं, शिलान्यासं, लोकार्पणं च कृतम्। प्रधानमन्त्री बालागढ़े विस्तारित-नौकाश्रय-द्वार-व्यवस्थायाः शिलान्यासं कृतवान्। कार्यक्रमं संबोधयन् प्रधानमन्त्री अवदत् यत् सर्वाः केन्द्रीय परियोजनाः पश्चिमबङ्गालस्य विकासं त्वरितं करिष्यन्ति।

## सुभाषितम्

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्,**
**विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।**
**विद्या बन्धुजनो विदेशगमने विद्या परा देवता,**
**विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ॥**

विद्या मनुष्य का विशिष्ट रूप है, गुप्त धन है। वह भोग देने वाली, यश देने वाली, और सुखकारक है। विद्या गुरुओं का गुरु है, विदेश में वह मनुष्य की बंधु है। विद्या बड़ी देवता है, राजाओं में विद्या की पूजा होती है, धन की नहीं। विद्याविहीन मनुष्य पशु के समान ही है।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## जीतन राम माझी षड्विंशत्यधिक-द्विसहस्रतम वर्षस्य प्रधानमन्त्री विश्वकर्मा-हाट- इत्यस्य उद्घाटनं विहितवान्




**हिमसंस्कृतवार्ताः** - सूक्ष्म-लघु-मध्यम-उद्यम (एम. एस. एम. ई.) इत्यस्य केन्द्रीयमन्त्री जीतन राम-माझी वर्यः एम. एस. एम. ई. इतीदं देशस्य विकासस्य मेरुदण्डः इति अवोचत्। श्रीमाञ्झी वर्यः नवदेहली-नगरे षड्विंशत्यधिक द्विसहस्रतम वर्षस्य प्रधानमन्त्री विश्वकर्मा-हाट- इत्यस्य उद्घाटनसमारोहं सम्बोधयन् आसीत्। सः अवदत् यत्, एषः कार्यक्रमः शिल्पिभ्यः स्वोत्पादानां प्रचाराय विक्रेणाय च मञ्चं प्रददाति। प्रधानमन्त्री विश्वकर्मा-योजनायाः विषये प्रवदन् माझी वर्यः अवदत् यत् एषा योजना देशे निरुद्योगस्य समाप्तेः माध्यमः अस्ति। अस्मिनवसरे कार्यक्रमं सम्बोधयन्ती एम. एस. एम. ई. राज्यमन्त्री शोभा करन्द-लाजे इत्येषा अवदत् यत्, प्रधानमन्त्री विश्वकर्मा-योजना तान्त्रिकसहाय्यं, प्रशिक्षणं, समुचित आपणे प्रवेशाय शिल्पिभ्यः साहाय्यं करोति। प्रदर्शन्याः उद्देश्यम् अस्ति यत् शिल्पिभ्यः स्वस्य हस्तनिर्मितानां उत्पादानां प्रदर्शनं विपणनं च। कार्यक्रमः अस्य मासस्य एकत्रिंशत् दिनाङ्क पर्यन्तं प्रातः सार्द्ध-दश-वादनादारभ्य रात्रौ दशवादन पर्यन्तं जनसाधारणाय उद्घाटितः भविष्यति ।

## अमेरिकादेशस्य सीनेटर स्टीव डैन्स इत्यनेन सह मेलनं कृतवान् विदेशमन्त्री



**हिमसंस्कृतवार्ता।** विदेशमन्त्री डा. एस. जयशङ्करः नवदिल्ल्याम् अमेरिकादेशस्य सीनेटर स्टीव डैन्स इत्यनेन सह मेलनं कृतवान्। सामाजिकान्तर्जालीये सन्देशे डा. जयशङ्करः अवदत् यत् मेलने उभौ पक्षौ द्वैपाक्षिक-सम्बन्धेषु तस्य सामरिक महत्त्वविषये च विस्तृतं मुक्तं च चर्चा कृतवन्तौ

## तृणमूल-काङ्ग्रेस दलं देशस्य संविधानस्य विनाशं करोति- किरेन रिजिजुः



हिमसंस्कृतवार्ता। केन्द्रीयसंसदीयकार्यमन्त्री किरेन रिजिजुः आरोपितवान् यत् टी. एम. सि. इति तृणमूल-काङ्ग्रेस दलं देशस्य संविधानस्य विनाशं करोति। स्वस्य सामाजिकान्तर्जालीये सन्देशे भाजपा-पश्चिमवङ्गस्य एकं लेखं विनिमयी कुर्वन्, मन्त्री आरोपितवान् यत् ते भारतीय नागरिकाणां मूलभूत-अधिकारान् अपहृत्य अवैध प्रवासिनां रक्षणं कुर्वन्तिती।

## महाराष्ट्र-राज्ये सोलापुर-पुणे-राष्ट्रिय-राजमार्गे,मार्गदुर्घटनायां पञ्च जनाः मृताः



महाराष्ट्र-राज्ये, मोहोल-नगरस्य समीपे सोलापुर-पुणे-राष्ट्रिय-राजमार्गे, दुःखद-मार्गदुर्घटनायां पञ्च जनाः मृताः, एका महिला च व्रणिता अभवत्। गतरात्रौ प्रायः एकादश वादने एषा दुर्घटना अभवत् यदा द्रुतगत्या गम्यमानस्य कार-यानस्य नियन्त्रणं नष्टः अभवत्। पीडिताः पनवेल-नगरात् अक्कल-कोट-नगरं प्रति धार्मिकयात्रायै गच्छन्तः आसन्। व्रणिता महिला मोहोल-नगरस्य सर्वकारीय-चिकित्सालये प्रवेशितास्ति। इतोऽपि अन्वेषणं प्रचलति।

# स्वास्थ्यक्षेत्रे क्रान्तिकारी-परिवर्तनं भविष्यति, राज्यं च वर्षत्रये देशे प्रथमस्थाने भविष्यति- मुख्यमंत्री सुक्खुः




**हिमसंस्कृतवार्ताः- डॉ पद्मनाभः, शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः घोषितवान् यत् राज्यसर्वकारः स्वास्थ्यक्षेत्रस्य सुदृढीकरणाय जाइका द्वितीयचरणस्य अन्तर्गतं ₹१३०० कोटिरूप्यकाणि व्यययिष्यति। सः अपि अवदत् यत् स्वास्थ्यसंस्थानां विश्वस्तरीयसाधनानाम् सज्जीकरणाय आगामिषु वर्षत्रयेषु प्रायः ₹३००० कोटिरूप्यकाणि व्ययितानि भविष्यन्ति। मुख्यमन्त्री शिमलानगरस्य पीटरहॉफ-अतिथिगृहे राज्यस्य मुख्यचिकित्साधिकारिभिः, खण्डचिकित्साधिकारिभिः, चिकित्सा अधीक्षकैः च सह राज्यस्तरीयं संवादसत्रं सम्बोधयन् आसीत् एतेन राज्ये मुख्यमन्त्री, बीएमओ, एमएस च इत्येतयोः मध्ये प्रथमः एतादृशः प्रत्यक्षः संवादः अभवत्। सार्धचतुर्होराणां संवादे मुख्यमन्त्री अधिकारिभिः सह स्वास्थ्यसेवासम्बद्धानां विविधानां समस्यानां परामर्शानां च विस्तरेण चर्चां कृतवान्। सः स्थले एव विषयाणां समाधानं कृतवान्, विविधविषयेषु निर्णयं कृतवान्, अधिकारिभ्यः स्पष्टमार्गदर्शिकाः च प्रदत्तवान्। मुख्यमन्त्री उक्तवान् यत् स्वास्थ्यक्षेत्रस्य सशक्तीकरणाय स्वास्थ्यप्रशासनस्य सुदृढीकरणम् अत्यावश्यकम्। एतदर्थं प्रशासनिकसंरचनायाः अन्तः वित्तीयशक्तयः विकेन्द्रीकृताः भविष्यन्ति। सीएमओ, बीएमओ, एमएस च अधिकं वित्तीयाधिकारं प्रदत्तं भविष्यति। प्रक्रियाणां सरलीकरणाय, सुव्यवस्थिताय च वित्तीयनियमेषु आवश्यकसंशोधनं भविष्यति।

**कार्यस्थे प्रशिक्षुवैद्यानां वेतनवृद्धेः विचारः**

सः अवदत् यत् स्वास्थ्यसंस्थासु स्वच्छतायाः वित्तीयशक्तेः च विषये निर्णयं कर्तुं सीएमओ-अधिकारिणः सशक्ताः भविष्यन्ति। चिकित्सालयेषु आवश्यकव्ययस्य पूर्तये एमएस- सीएमओ- इत्यनयोः कृते विशेषकोषः अपि आवंटितः भविष्यति। कार्ये प्रशिक्षुवैद्यानां वेतनवृद्धेः विषये विचारः भविष्यति इति मुख्यमन्त्री घोषितवान्। सः अवदत् यत् राज्ये २३६ वैद्यानां नियुक्तिप्रक्रिया प्रचलति, १५० अतिरिक्तपदानां च अनुमोदनं कृतम् अस्ति। नियुक्तिप्रक्रियाम् अधिकापारदर्शी कर्तुं लिखितपरीक्षायाः साक्षात्कारस्य च अङ्कान् अन्तिमपरिणामे समाविष्टुं प्रावधानं कृतम् अस्ति। सुक्खुः उक्तवान् यत् व्यवस्थापरिवर्तनस्य लक्ष्यं कृत्वा क्रियमाणानां पलिष्काराणां परिणामः एकवर्षेण अन्तः स्वास्थ्यक्षेत्रे क्रान्तिकारी परिवर्तनं भविष्यति। आगामिषु वर्षत्रयेषु स्वास्थ्यसेवाक्षेत्रे हिमाचलप्रदेशः देशस्य प्रथमक्रमाङ्कस्य राज्यं भविष्यति।

## १५ वर्षाणि पुरातनानि उपकरणानि प्रतिस्थापितानि भविष्यन्ति

सः अवदत् यत् राज्ये स्थापिताः आदर्शस्वास्थ्यसंस्थाः स्वास्थ्यसेवापरिष्कारार्थं महत्त्वपूर्णां भूमिकां निर्वहन्ति। एतेषु संस्थानेषु विश्वस्तरीयगुणवत्तायुक्तानि उपकरणानि प्रदत्तानि भविष्यन्ति। १५ वर्षाणि पुरातनानि उपकरणानि प्रतिस्थाप्यन्ते, येन रोगिभ्यः उत्तमसुविधाः प्राप्यन्ते, वैद्यानां कार्यभारः न्यूनीकरिष्यते च। प्रत्येकस्मिन् आदर्शस्वास्थ्यसंस्थायां ऑपरेशन थिएटर अपि सुनिश्चितं भविष्यति। मुख्यमन्त्री उक्तवान् यत् सर्वेषु स्वास्थ्यसंस्थानेषु सुरक्षा सुदृढा भविष्यति, येषां कृते सुरक्षापूर्वसेनानिगमस्य माध्यमेन सुरक्षासेवाः प्रदत्ताः भविष्यन्ति। प्राथमिकस्वास्थ्यकेन्द्राणि प्रसवकेन्द्राणि च स्पष्टतया परिभाषितमापदण्डानां आधारेण युक्तिकरणं करिष्यन्ति येन दक्षतां सुलभतां च वर्धयितुं शक्यते।

# केवलं सेवानिवृत्तमित्राणां कृते एव सर्वकारस्य अनुग्रहः अस्ति, अनुद्योगिभ्यः १२ कोटिरूप्यकाणां शुल्कं च संगृहीतम्- जयरामठाकुरः




**हिमसंस्कृतवार्ताः- मण्डी।** पूर्वमुख्यमन्त्री विपक्षनेता च जयरामठाकुरः उक्तवान् यत् एतत् सर्वकारं राज्यस्य लक्षाधिक- अनुद्योगियुवकानां भविष्यस्य विषये चिन्ताहीनं मित्राणां सर्वकारं जातम्। राज्यस्य शिक्षिताः युनः वीथिषु भ्रमितुं बाध्यन्ते, मुख्यमन्त्री तु केवलं स्वस्य निवृत्तमित्रेषु प्रियतमेषु च सर्वाणि अनुग्रहाणि वर्षयति। तस्य कार्यकालस्य चतुर्थवर्षस्य आरम्भे ५३० पटवारीपदानां विज्ञापनं निर्गतम्। अस्य विज्ञापनस्य माध्यमेन लक्ष्मितैः निर्धन- मध्यम-वर्गीयपरिवारस्य अभ्यर्थिभ्यः परीक्षाशुल्कस्य नामधेयेन १२ कोटिरूप्यकाणां विशालराशिः एकत्रिता।लज्जाजनकः पक्षः अस्ति यत् एतेषां पदानाम् लिखितपरीक्षा अपि न कृता, तथापि पृष्ठद्वारमार्गेण एतेषु पदस्थानेषु स्वस्य प्रियनिवृत्तकर्मचारिणः पुनः नियुक्तेः प्रक्रियां सर्वकारेण त्वरितम् अस्ति। यदि सर्वकारः केवलं स्वस्य निकटसहकारिभ्यः सेवानिवृत्तेभ्यः मित्रेभ्यः च लाभं वितरितुं इच्छति तर्हि परीक्षायाः एतत् स्वाङ्गं किमर्थम्? बीपीएल- परिवारस्य पुत्रीभ्यः विवाहाय समर्थनं दातुं उद्दिश्य मुख्यमन्त्री शगुनयोजना अद्य सर्वकारस्य उपेक्षायाः, दुर्व्यवस्थापनस्य च ग्राही अभवत्। सिरमौरमण्डलस्य एतत् नवीनतमम् उदाहरणं लज्जाजनकम् अस्ति, यत्र १९३ लाभार्थिनां प्रायः ६० लक्षरूप्यकाणि कोषे निरुद्धानि सन्ति। ते प्रतिमासं महिलाभ्यः १५०० रूप्यकाणि दातुं मिथ्याप्रतिश्रुतिं दत्तवन्तः, अधुना एकमपि नाणकमपि न दत्त्वा महिलाभ्यः धनं दातुं मृषा वदन्तः देशे परिभ्रमन्ति। परन्तु अस्माभिः पूर्वं आरब्धा प्रथा अपि सर्वकारेण स्थगिता यत् प्रतियोगितापरीक्षासु राज्यस्य कन्याभ्यः किमपि शुल्कं न गृह्णाति।

# भारतस्य विद्युत्-वितरण-उपयोगिताः २०२४-२५ तमे वर्षे २७०१ कोटि-रूप्यकाणां कर-पश्चातलाभं (पिएटि) उल्लिखितवन्तः

भारतस्य विद्युत्-वितरण-उपयोगिताः चतुर्विंशत्यधिक द्विसहस्र, पञ्चविंशत्यधिक द्विसहस्रतमे वर्षे एकोत्तर-सप्त-शताधिक-द्वि-सहस्र-कोटि-रूप्यकाणां कर-पश्चातलाभं (पिएटि) उल्लिखितवन्तः। विद्युत्मन्त्रालयस्य अनुसारं, राज्यविद्युत्-मण्डलानां एकीकरणात् निगमीकरणात् च विगतेभ्यः वर्षेभ्यः समग्रतया वितरण-उपयोगिताः पी. ए. टी.-हानिं निवेदयन्तः सन्ति।

# लाहौल्, रोहताङ्ग, शिन्कुला, बारालाचा, कुन्जुम-दर्रेषु श्वेतवर्णीयः हिमपातः

रविवासरे लाहौल-स्पिटी-नगरस्य उच्चप्रदेशेषु हिमपातः अभवत् । हिमपातस्य कारणेन तापमानं न्यूनीकृतम्। परन्तु लाहौलस्य निम्नप्रदेशेषु महत्त्वपूर्णः शीतस्नापः अभवत् । शिखराः हिमेन श्वेताः अभवन् । पाश्चात्यस्य उपद्रवस्य प्रभावः अधुना तीव्रः भवति । रोहताङ्ग-शिन्कुला-बरालाचा-कुन्जुम-दर्रेषु, चन्द्रताल-सरोवरेषु च नवीनः हिमपातः अभवत् । उच्चशिखरेषु विगतदिनत्रयात् हिमपातः भवति, निम्नप्रदेशाः अद्यापि तस्य प्रतीक्षां कुर्वन्ति । जनवरीमासे २२ दिनाङ्कात् आरभ्य राज्ये सर्वत्र वर्षा, हिमपातः च भविष्यति। पर्यटनव्यापारैः सह कृषकाणां, मालीनां च तृष्णा अद्यापि न शामिता। परन्तु लहौल-स्पिटी, मनाली उपत्यका च मेघाः आच्छादयन्ति, येन हिमपातस्य आशा वर्धते। हिमपातस्य आशायां पर्यटकाः बहुसंख्येन कुल्लू-मनाली-नगरं प्रति गच्छन्ति ।



# विमानेन यात्रा, वन्देभारतस्य यात्रा.., सुख- आश्रययोजनायाः बालकाः भारतभ्रमणं कृत्वा शिमलां प्रत्यागताः



हिमसंस्कृतवार्ताः- शिमला। "राज्यस्य बालकाः" स्वयात्रायाः प्रत्यागत्य शनिवासरे सायं शिमलानगरस्य ओकओवर-इत्यत्र मुख्यमन्त्रिणं सुखविन्दरसिंहसुक्खुं मिलित्वा स्वयात्रानुभवं उष्णतया प्रकटीकृतवन्तः। ते मुख्यमन्त्रिणम् अवदन् यत् एषः स्मरणीयः अनुभवः आजीवनं पोषितः भविष्यति। मुख्यमन्त्री बालकान् पृष्टवान् यत् ते गोवायां कियत्कालं यावत् अतिष्ठन्, क्रूजं कृतवन्तः वा, समुद्रतटस्य विषये तेषां कथं भवति इति। सः तान् पृष्टवान् यत् विमानस्य अनुभवः कथं अस्ति, आरोहणपूर्वं बोर्डिंग पासस्य प्रक्रिया कथं भवति इति। सः तान् पृष्टवान् यत् आगरा- भ्रमणस्य विषये तेषां मनसि कथं भवति, यात्रायाः कालस्य मध्ये तेषां किं किं नूतनानि वस्तूनि ज्ञातानि इति। मुख्यमन्त्री सुक्खुः "राज्यस्य बालकान्" अवदत् यत् यात्रा मनोरञ्जका बोधप्रदा च भवति। सः तेषाम् अनुभवान् जीवनस्य प्रेरणास्रोतरूपेण उपयोक्तुम् आग्रहं कृतवान्।

## वन्देभारत-मेट्रो-क्रूजभ्रमणम्

बालकाः विविधानि आधुनिकयानविधानानि अपि अनुभवन्ति स्म, यथा वोल्वोबस, वन्देभारत- एक्स्प्रेस- रेलयानं, मेट्रोरेल्सेवा, विमानयात्रा, क्रूजयात्रा, हॉप-ऑन, हॉप-ऑफ पर्यटनबसयानं च।

### एतेषां स्थलानां भ्रमणं कृतम्

भ्रमणकाले बालकाः लालदुर्गं, कुतुबमीनारं, इण्डियाद्वारं, राजघाटं, शक्तिस्थलं, वीरभूमिं, हुमायोंः समाधिस्थलं, राष्ट्रिय- प्राणिविज्ञान- सङ्ग्रहालयम्, उत्तरखण्डं, दक्षिणखण्डं, भारतीय- विश्वकार्याणां परिषदं, त्रिवेणीकलासंगमं, दिल्लीनगरस्य राष्ट्रियप्राकृतिकइतिहाससङ्ग्रहालयं च गतवन्तः। आगरानगरस्य ताजमहलस्य अपि भ्रमणं कृतवन्तः। गोवायां वसन्तः बालकाः कलाङ्गुट, फोर्ट अगुआडा, अञ्जुनसमुद्रतटं, डोना पौला, भारतीयसमुद्रविज्ञानसंस्थानं गत्वा उत्तरगोवायां क्रूजं कृतवन्तः, दक्षिणगोवायां तु चर्चाः, मङ्गेशीमन्दिरं, वर्कासमुद्रतटं, पणजीनगरं, मसालोद्यानानि च आनन्दितवन्तः

## यात्रा आत्मविश्वासं वर्धयति

मुख्यमन्त्री उक्तवान् यत् शैक्षिक- अनुभवात्मक- यात्राभिः बालकानां आत्मविश्वासः, जिज्ञासा, देशस्य विविधतायाः अवगमनं, सामाजिकचेतना च विकसितुं साहाय्यं भवति।

## "उड्डयनस्य स्वप्नाः" (सपनों की उड़ान) इति पुस्तकस्य विमोचनम्।

मुख्यमन्त्री बालयात्राविषये पुस्तकं स्वप्नानाम् उड्डयनम् अर्थात् "सपनों की उड़ान" इति पुस्तकमपि प्रकाशितवान्। अस्मिन् अवसरे बाल- भारत- भ्रमणस्य विषये लघुवृत्तचित्रम् अपि प्रस्तुतम्। अस्यां यात्रायां ५२ बालकाः भागं गृहीतवन्तः, यस्मिन् काले ते देशस्य विभिन्नानि प्रमुखनगराणि, ऐतिहासिक- सांस्कृतिक- शैक्षिक- स्थलानि च गतवन्तः।

# महिला- बाल- सशक्ति- करणाय प्रतिबद्धः राज्यसर्वकारः- मुख्यमन्त्री सुखविन्दरसिंह सुक्खुः




हिमसंस्कृतवार्ताः- शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् विगतत्रिवर्षेषु राज्यसर्वकारेण "व्यावस्थापरिवर्तनम्" इत्यस्य अन्तर्गतं बृहत् साहसिकं च पदं गृहीतम्। अस्य उद्देश्यं महिलानां सशक्तिकरणं, सशक्तिकरणं च, समावेशीविकासं सुनिश्चितं कर्तुं च अस्ति। सः अवदत् यत् राज्यस्य बाललिंगानुपातः विगतत्रिषु वर्षेषु ९४७ तः ९६४ यावत् वर्धितः अस्ति। एतद् परिवर्तनं बालिकानां रक्षणाय, सम्मानाय च सर्वकारस्य निरन्तर- निष्कपट- प्रयत्नस्य परिणामः अस्ति। सः अवदत् यत् एतेन सकारात्मकपरिष्कारेण अनेकेषां नूतनानां महत्त्वपूर्णानां च कल्याणकारी- उपक्रमाणाम् आधारः स्थापितः। मुख्यमन्त्री उक्तवान् यत् इन्दिरागान्धी सुखसुरक्षायोजनायाः अन्तर्गतं दारिद्र्यरेखायाः अधः निवसतां परिवारेषु जायमानानां कन्याः जन्मसमये ₹२५,००० इत्येव निक्षेपः भवति। तदतिरिक्तं मातापितृभ्यां कृते ₹2 लक्ष-रूप्यकाणां जीवनबीमा प्रदत्ता अस्ति, यत् पुत्र्याः १८ वर्षाणि प्राप्ते अथवा यथा इष्टं २७ वर्षाणि यावत् निष्कासयितुं शक्यते। सः अवदत् यत् एषा योजना "बेटी है अनमोल योजना" अधिकं सुदृढां कृतवती। श्रमिकमहिलानां सुरक्षां प्रदातुं सर्वकारेण सोलनं, पालमपुरम्, बद्दी, गगरेट, नगरोटा बगवां इत्यादिषु विभिन्नेषु जनपदेषु १३ नवीनमहिलाछात्रावासस्य निर्माणस्य निर्णयः कृतः अस्ति। एतेषु छात्रावासेषु प्रायः ₹132 कोटिरूप्यकाणि व्ययितानि भविष्यन्ति। एतेषु छात्रावासेषु महिलानां कृते सुरक्षितं अल्यमूल्येन च आवासं प्राप्यते। मुख्यमन्त्री उक्तवान् यत् राज्यस्य सर्वाणि १८,९२५ आंगनबाडीकेन्द्राणि "आंगनबाडी- सह- पूर्वविद्यालयाः" इति रूपेण विकसितानि सन्ति, येन ३ तः ६ वर्षाणि यावत् आयुषः बालकानां कृते क्रीडा- आधारित- प्रारम्भिक- बाल्यकालस्य शिक्षा प्रदत्ता अस्ति। बालशिक्षायाः आधारं सुदृढं कर्तुं आंगनबाडी- कर्मचारिणः विशेषप्रशिक्षणं प्राप्नुयुः।सर्वकारस्य प्रमुखस्य "सुख- आश्रययोजनायाः" उल्लेखं कुर्वन् मुख्यमन्त्री अवदत् यत् एषा योजना अनाथबालानां, निराश्रयाणां च महिलानां कृते ऐतिहासिकं सोपानम् अस्ति। अस्य अन्तर्गतं राज्यसर्वकारः तेषां पालनपोषणस्य, शिक्षायाः, आजीविकायाः च पूर्णं उत्तरदायित्वं गृह्णाति, यत् आत्मनिर्भरतायाः मार्गे कोऽपि बालकः महिला वा पृष्ठतः न अवशिष्यते इति सुनिश्चितं करोति मुख्यमन्त्री उक्तवान् यत् एताः सर्वाः दूरदर्शीः उपक्रमाः समावेशीविकासाय समाजकल्याणाय च अस्माकं दृढप्रतिबद्धतां प्रतिबिम्बयन्ति। कन्याः, महिलाः, बालकाः च केन्द्रीकृत्य वयं हिमाचलप्रदेशं सुदृढं, आत्मनिर्भरं, समानं भविष्यं प्रति नेष्यामः।

# १२८ विद्यालयेषु सीबीएसई पाठ्यक्रमं पाठयितुं सज्जता प्रचलति, मन्त्रिमण्डलेन मार्गदर्शिकाः अनुमोदिताः

हिमसंस्कृतवार्ता। हिमाचलप्रदेशे अधुना सीबीएसई- पाठ्यक्रमस्य पाठः १२८ विद्यालयेषु भविष्यति, न तु केवलं ११८ विद्यालयेषु सोमवासरे निर्धारिता राज्यमन्त्रिमण्डलसभा एतेषां विद्यालयानां मार्गदर्शिकानां अनुमोदनं करिष्यति। प्रारम्भे ११८ सर्वकारीयविद्यालयानां चयनं कृतम् । अधुना १० अधिकाः विद्यालयाः सम्बद्धतायै आवेदनं कृतवन्तः। सीबीएसई विद्यालयेषु शिक्षकचयनार्थं परीक्षाः करणीयाः वा न वा इति अपि मन्त्रिमण्डलसभायां निर्णयः भविष्यति। राज्यस्य चयनितसर्वकारीयविद्यालयाः २०२६-२७ शैक्षणिकवर्षात् आरभ्य सीबीएसई पाठ्यक्रमे संक्रमणं कर्तुं निश्चिताः सन्ति। सीबीएसई विद्यालयानां शिक्षकचयनसम्बद्धा स्थितिः सम्प्रति अस्पष्टा अस्ति। परन्तु अद्यैव सर्वकारेण परीक्षाद्वारा शिक्षकाणां चयनस्य निर्णयः कृतः।

## शिक्षकेभ्यः नियमाः

शिक्षाविभागेन सीबीएसई विद्यालयानां कृते शिक्षकानां उपकार्यकर्तृणां निर्माणस्य नियमाः अन्तिमरूपेण निर्धारिताः। ३० दिसम्बर् दिनाङ्के आयोजिते मन्त्रिमण्डलस्य सत्रे अस्य विषयस्य विस्तरेण चर्चा अभवत् । १९ जनवरी दिनाङ्के निर्धारिते मन्त्रिमण्डलसभायां अस्य प्रस्तावस्य पुनः अवलोकनं क्रियते इति कथ्यते। शिक्षकचयनार्थं परीक्षां कर्तुं निर्णयः कृतः। एतस्य पुनः चर्चा भविष्यति। अध्यापकवर्गस्य पदस्य च अनुसारं प्रश्नपत्राणि निर्मायिष्यन्ते इति निर्णयः कृतः, येन विषयविशेषज्ञतायाः अध्यापनक्षमतायाः च समीचीनमूल्यांकनं कर्तुं शक्यते।

## शिक्षामन्त्री कथयति

शिक्षामन्त्री रोहितठाकुरः कथयति यत् निजीविद्यालयेषु अधिकशुल्कस्य कारणात् निर्धनमध्यमवर्गीयपरिवारेभ्यः बहवः तेजस्वी छात्राः सीबीएसईशिक्षां प्राप्तुं असमर्थाः सन्ति। इदानीं तेषां कृते एषः सुवर्णमयः अवसरः यत् ते इदानीं सर्वकारीयविद्यालयेषु सीबीएसई-शिक्षां प्राप्तुं शक्नुवन्ति। सः कथयति यत् सीबीएसई-अन्तर्गतं चयनितविद्यालयाः अस्मिन् सत्रे कक्षाः आरभ्यन्ते येन छात्राणां अधिकं प्रतीक्षा न भवति।

# कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयः संस्कृतभारती इत्यनयोः यौथप्रयासेन आयोजितः निःशुल्कदशदिवसीयः संस्कृत- सम्भाषणवर्गस्य समापनसमारोहः




**हिमसंस्कृतवार्ताः- जगदीश डाभी।** केन्द्रीय- संस्कृत- विश्वविद्यालयस्य अधीनस्थेन कलियाचकविक्रमकिशोर- आदर्श- संस्कृत- महाविद्यालयेन संस्कृतभारत्याः सहयोगेन निःशुल्कः दशदिवसीयः संस्कृतसम्भाषणवर्गः २०२६तम आङ्ग्लवर्षस्य जानुयारीमासस्य नवमदिनाङ्काद् अष्टादशदिनाङ्कं यावद् आयोजितः। नवमे दिनाङ्के (०९.०१.२०२६) महाविद्यालयस्य सभागारे कार्यक्रमस्य अस्य उद्घाटनम् अभवत्। ततः दशदिनानि संस्कृतसम्भाषण वर्गः अचलत्। संभाषणवर्गे संस्कृतभारतीपक्षतः भाषाशिक्षिकात्वेन बर्णालि गुमट्या महोदया एतेषु दिवसेषु छात्रान् पाठितवती। अष्टादशतमे दिनाङ्के महाविद्यालयस्य अस्य सभागारे अस्य निःशुल्क- दशदिवसीय- संस्कृतसंभाषणवर्गस्य समापनसमारोहः साडम्बरं परिपालितः। अस्य अनुष्ठानस्य अध्यक्षत्वेन प्राचार्यपादाः डॉ. व्रजेन्द्रकुमारसिंहदेवमहाभागाः अवर्तन्त। संस्कृतभारतीपक्षतः संस्कृतभारतीदक्षिणवङ्गस्य प्रान्तमन्त्रिणः डा० सन्तुदत्तमहाभागाः, संस्कृतभारतीदक्षिणवङ्गस्य प्रान्तशिक्षणप्रमुखाः श्रीमन्तः मधुसूदनजानामहोदयाः, संस्कृभारतीदक्षिणवङ्गस्य जनपदसंयोजकाः श्रीमन्तः सन्दीपनभट्टाचार्यमहोदयाः च प्रधानातिथित्वेन कार्यक्रमस्य अस्य शोभां वर्धितवन्तः। अनुष्ठाने अस्मिन् उपस्थिताः आसन् विशिष्टाः समाजसेवकाः जगदीशभूञामहोदयाः। पुनः संस्कृतभारतीतः आगता भाषाशिक्षिका बर्णाली गुमट्या महोदया अपि कार्यक्रमस्य अतिथित्वेन विराजमाना आसीत्। अन्ये च महाविद्यालयस्य वरिष्ठाः आचार्याः डा० अमरेन्द्रकुमारमिश्रमहाभागाः, साहित्यविभागस्य आचार्याः सम्भाषणवर्गस्य संयोजकाः च डा० नृसिंहनाथगुरुवर्याः मञ्चस्थाः सन्त अनुष्ठानस्य अस्य शोभां वर्धितवन्तः। अध्यक्षरूपेण अनुष्ठानमिदम् आसमन्ताद् वीक्ष्यमाणाः महाविद्यालयस्य अस्य प्राचार्यपादाः श्रीमन्तः डा० व्रजेन्द्रकुमारसिंहदेवमहाभागाः संस्कृतभारतीपक्षतः आगताः सर्वे अतिथयः च दीपप्रज्वालनेन भगवत्यै पुष्पादिसमर्पणेन च अनुष्ठानमिदं आरभन्त। महाविद्यालयस्य छात्राः शुभमपाणिग्राहीप्रभृतयः वैदिकमङ्गलाचरणेन तथा च महाविद्यालयस्य समे शिक्षकाः छात्राश्च महाविद्यालस्य प्रार्थनां गायन्तः अनुष्ठामिदम् अग्रे सारितवन्तः। अनुष्ठानस्य अस्य सञ्चालकाः आसन् व्याकरणविभागस्य अतिथ्यध्यापकः डॉ. सुखदेवसाउमहोदयाः। अनुष्ठानस्य अस्य संयोजकाः डॉ. नृसिंहनाथगुरुवर्याः संस्कृतस्य माहात्म्यम् अन्वाख्याय छात्राणां कृते संस्कृतसम्भाषणवर्गस्य माहात्म्यम् उपयोगितां च बोधितवन्तः ततश्च इतः परं समेऽपि यथा महाविद्यालयपरिसरे गृहे च यथाशक्ति संस्कृतेन एव वार्तालापं कुर्युः तथा प्रबोधितवन्तः कृतवन्तः। ततः संस्कृतभारती- दक्षिणवङ्गस्य प्रान्तमन्त्रिणः डॉ. सन्तुदत्तमहाभागाः स्वकीयतेजस्वीभाषणेन सर्वेषां मुखे संस्कृतमानेतुं संस्कृतस्य प्रचाराय सर्वान् उद्बोधितवन्तः। उक्तवन्तः च यदि वयं सर्वे मिलित्वा संस्कृतेन सम्भाषणं कुर्मः तर्हि न कस्यापि साहसं भवेत् इदं वक्तुं यत् संस्कृतं मृतभाषा अस्ति अथवा संस्कृतं व्यवहारिकी भाषा भवितुं नार्हति इति। अग्रे संस्कृतभारतीदक्षिणवङ्गस्य प्रान्तशिक्षणप्रमुखाः मधुसूदनजानामहोदयाः लघुकथाद्वारा संस्कृतस्य महत्त्वं किञ्च संस्कृतं कथम् अस्मासु जीवेत् इत्यस्मिन् विषये सम्यग् बोधितवन्तः। विशिषसमाजसेविनः जगदीशभूञामहोदयाः अपि स्ववाक्पुष्पैः सर्वान् प्रबोधितवन्तः। अग्रे प्राचार्यपादाः डॉ. व्रजेन्द्रकुमारसिंहदेवमहाभागाः अपि अतिथीनां प्रति सौहार्दं ज्ञापितवन्तः। अन्ते च संस्कृतसम्भाषणवर्गे ये छात्राः सामाजिकाश्च भागं गृहीतवन्तः तैः कश्चन सांस्कृतिककार्यक्रमः आयोजितः आसीत् यस्मिन् तावत् छात्राः संस्कृतेन एकं लघुनाटकम् अपि आचरितवन्तः। ततः आगताः अतिथयः छात्राणां कृते प्रमाणपत्राणि अपि वितरितवन्तः। ततः अग्रे अनुष्ठाने भागगृहीतवतां समेषां कृते स्ववाक्पुष्पैः धन्यवादान् ज्ञापितवन्तः अनुष्ठानस्य संयोजकाः डा० नृसिंहनाथगुरुवर्याः ततः शान्तिमन्त्रेण अनुष्ठानमिदं सुष्ठु सम्पन्नम्।

# प्रो. रमाकान्तपाण्डेयवर्येण उत्तराखण्ड- संस्कृत- विश्वविद्यालये हरिद्वारे कुलपतिपदे कार्यभारः गृहीतः



**हिमसंस्कृतवार्ताः- डॉ. मूलचन्द्रशुक्लः, हरिद्वारम्।** भारतीयप्राच्यविद्यायाः मनीषिणे, कुशलप्रशासकाय, छात्रवत्सलाय समादरणीयाय आचार्यः रमाकान्त पाण्डेय महोदयाय उत्तराखण्ड- संस्कृतविश्वविद्यालये, हरिद्वारे कुलपतिरूपेण नियुक्तये वयं हार्दमभिनन्दनानि शुभाशंसाश्च समर्पयामः। प्रो. रमाकान्तपाण्डेयवर्यः संस्कृत- वाङ्मयान्तर्गत- विशेषरूपेण संस्कृतसाहित्ये, काव्यशास्त्रे, नाट्यशास्त्रे, भारतीय- ज्ञान- परम्परासन्दर्भे च एकः प्रख्यातः मेधायुतो विद्वान् वरीवर्ति। भवता दीर्घकालपर्यन्तम् अध्यापन– अनुसन्धान– मार्गदर्शन– शैक्षणिकनेतृत्वादिभिः संस्कृतविद्यायाः भारतीयविद्यायाश्च क्षेत्रं समृद्धीकृतम्। भवता सम्पादितानि शोधकार्याणि, ग्रन्थलेखनम्, सम्पादनकर्म, शोधार्थिनां निर्देशनं च इत्यादीनि महत्त्वपूर्णानि प्रशस्तकार्याणि प्रतिबद्धविद्वत्त्वस्य सुदृढं प्रमाणम्। केन्द्रीय- संस्कृत- विश्वविद्यालयस्थयोः भोपाल -जयपुर- परिसरयोः निदेशकपदस्य महत्त्वपूर्णं दायित्वं निर्वहता भवता शैक्षणिकगुणवत्ता, अनुसन्धानसंस्कृतिः, संस्थागतानुशासनं च नवदिशामा नीतम्। भवतः व्यक्तित्वे विद्वत्तया सह प्रशासनिककौशलं विशेषरूपेण संयुज्यते। एकतो भवतः शास्त्रसम्मतं गहनं गभीरञ्चाध्ययनं सर्वत्र प्रशस्यते, अपरतश्च भवतः दृष्टिः व्यावहारिकी, दूरदर्शिनी, कर्मयुता च सन्तिष्ठति। छात्रहिताय, अध्यापकसम्माननाय, विश्वविद्यालयस्य सर्वाङ्गीण- विकासाय च भवतः निष्ठा सर्वविदिता चकासति। एतादृशस्य विदुषः उत्तराखण्ड- संस्कृत- विश्वविद्यालयस्य कुलपतिरूपेण नियुक्तिः संस्कृतशिक्षायाः भारतीयज्ञानविज्ञानस्य च क्षेत्रे नितरां मङ्गलकारिणी भविष्यति। कुलपतिवर्येण वार्ताक्रमे प्रोक्तं यत् उत्तराखण्ड- संस्कृत- विश्वविद्यालयः न केवलं शैक्षणिकौत्तम्यस्य नूतनमानदण्डान् स्थापयिष्यति, अपि तु अनुसन्धानं, नवाचारः, पाण्डुलिपिशास्त्रम्, लोकविज्ञानं, योगः, दर्शनं, भारतीय- ज्ञान- परम्पराणां संरक्षण–संवर्धनं च कृत्वा एकं सशक्तं ज्ञानकेन्द्रं भविष्यति। अग्रे तेनोक्तं यत् एषः विश्वविद्यालयः राष्ट्रियस्तरे अन्ताराष्ट्रियस्तरे च भारतीयविद्यायाः प्रभावशाली प्रतिनिधिरूपेण प्रतिष्ठां प्राप्स्यति। अस्मिन् शुभावसरे वयं प्रार्थयामः यत् भवान् उत्तमस्वास्थ्येन, दीर्घायुषा, अपारयशसा च एतद् दायित्वं सफलतया निर्वहन् संस्कृतविद्यां भारतीयज्ञानपरम्परां च नूतनशिखराणि प्रति नेतुं समर्थो भवतु। उत्तराखडस्य माननीय- राज्यपाल- महोदयैः विश्वविद्यालयस्य च कुलाधिपतिभिः ले. ज. गुरमीत सिंह वर्यैः प्रो. रमाकान्त पाण्डेय वर्यः कुलपतिपदे नियुक्तः। प्रो. पाण्डेयवर्यः उत्तरप्रदेशस्य चित्रकूटस्थस्य सकरौंहा इति ग्रामस्य वास्तव्यो प्रस्थातः मूर्धन्यश्च मनीषी वर्तते। अस्य अनुजः सुकविः, लेखकश्च डॉ. उदितनारायणपाण्डेयः उत्तरप्रदेश- सर्वकारे ए. आर. टी. ओ. प्रवर्तनपदे नियुक्तो वर्तते।

# दरभङ्गायाः अन्तिमायै महाराण्यै कामसुन्दरीसाहिबायै भावपूर्णा श्रद्धाञ्जलिः



## कल्याणीनिवासे गरिमामयी श्रद्धाञ्जलिसभा सम्पन्ना

**हिमसंस्कृतवार्ताः- राघवनाथझा दरभङ्गा।** अष्टादश- जनवरी दिनांके द्विसहस्रषड्विंशतितमे (१८.०१.२०२६), दरभङ्गानगरे स्थिते कल्याणीनिवासे महाराजाधिराज- कामेश्वरसिंह- कल्याणी- फाउण्डेशनस्य तत्त्वावधाने दरभङ्गा- राज्यस्य अन्तिमायाः महाराण्याः, फाउण्डेशनस्य च दाता- न्यासिन्याः महाराण्याः कामसुन्दरीसाहिबायाः स्मृत्यर्थम् अत्यन्ता गरिमामयी भावपूर्णा श्रद्धाञ्जलिसभा आयोजिता। अस्मिन् अवसरे न्यासिनः, गणमान्य-नागरिकाश्च महाराण्याः तैलचित्रे पुष्पाञ्जलिं समर्प्य श्रद्धां निवेदितवन्तः। वक्तृभिः प्रतिपादितं यत् महाराणी कामसुन्दरीसाहिबायाः जीवनं दरभङ्गा- राज्यस्य इतिहासे एकः शान्तः, गम्भीरश्च अध्यायः आसीत्, यः किमपि आडम्बरं विना अपि दीर्घकालिकं प्रभावं प्रसारितवान्। मिथिलायाः सांस्कृतिक- राजधानीरूपेण विख्यातायाः दरभङ्गायाः शिक्षा- संस्कृत- शास्त्र- धर्म- समाजसेवा- परम्परायाः सा अन्तिमा सजीवकडी आसीत्। महाराजाधिराज- कामेश्वरसिंह- महाभागेन सह सम्बद्धं तस्याः जीवनं तस्य ऐतिहासिक- कालखण्डस्य साक्षी आसीत्, यस्मिन् राजसत्ता केवलं वैभवस्य प्रतीकं न आसीत्, अपि तु लोककल्याणस्य सामाजिक- उत्तरदायित्वस्य च प्रभावी साधनम् आसीत्। सभायां फाउण्डेशनस्य न्यासी पद्मश्रीः डॉ. जितेन्द्रकुमारसिंहः अवदत् यत् महाराणी साहिबा स्वकालेऽपि अग्रगामिनी, असाधारणी च बौद्धिक- व्यक्तित्वा आसीत्। सा केवलं राजपरिवारस्य प्रतिनिधिः न, अपि तु ज्ञान- विवेक- संवेदना- सामाजिक- दायित्वैः सम्पन्ना सजगा चिन्तिका आसीत्। तेन अवदत्- “महाराण्याः नाम योगदानं च केवलं स्मृतिषु सीमितं न करणीयम्। यावत् तस्याः नाम जीवति, तावत् तस्याः विरासत् अपि जीवति।” फाउण्डेशनस्य न्यासी प्रो. शिरीशचन्द्रचौधरी अवदत् यत् महाराणी साहिबा मिथिलायाः बौद्धिक- सांस्कृतिक- परम्परायाः सशक्ता संवाहिका आसीत्। शिक्षा- साहित्य- कला- समाजसेवा- क्षेत्रेषु तस्याः योगदानम् अद्यापि शोधकर्तृणाम्, अध्यापकानां, विद्यार्थिनां च कृते प्रेरणास्रोतः अस्ति। एवमेव पण्डितः रामचन्द्रझावर्य अवदत् यत् महाराण्याः सम्पूर्णं जीवनं त्याग- सेवा- जनकल्याण- परम्परायाः प्रतीकं आसीत्। तस्याः योगदानं मिथिलायाः सामाजिक- सांस्कृतिक- इतिहासे सुवर्णाक्षरैः अङ्कितं भविष्यति। श्रद्धाञ्जलिसभायां विशालजीतसिंहः ‘राठौरः’, श्रीवरुणकुमारसिंहश्च उपस्थिताः आसन्। सर्वैः वक्तृभिः एकस्वरेण प्रतिपादितं यत् महाराण्याः बौद्धिक-विरासत्, विचाराः, सामाजिक- योगदानं च संरक्षितं कृत्वा भावि-पीढीपर्यन्तं प्रेषयितुं फाउण्डेशनस्य प्रमुखः उद्देश्यः अस्ति, यस्मिन् दिशि न्यासः निरन्तरं सक्रियः भविष्यति।

**प्रमुखतया उपस्थिताः**-दरभङ्गा- राजपरिवारस्य रत्नेश्वरसिंहः, पद्मश्रीः डॉ. जितेन्द्रकुमारसिंहः, प्रो. शिरीशचन्द्रचौधरी, पण्डितः रामचन्द्रझा, उदयनाथझा, श्रुतिकरझा, पारसनाथसिंहठाकुरः, विशालजीतसिंहः ‘राठौर’, वरुणकुमारसिंहः, अजयधारीसिंहः, डॉ. मञ्जरसुलैमानः, डॉ. सुशान्तकुमारः, डॉ. मो. जमीलहसन अंसारी, सन्तोषकुमारझा इत्यादयः।

# संस्कृताध्ययनकेद्रं पालिताणाद्वारा विद्योत्तमास्वयंवरं संस्कृत नाटकं मञ्चितम्



**हिमसंस्कृतवार्ताः- जगदीश डाभी।** स्वदेशी अभियान अन्तर्गतं गुजरातराज्यस्य सङ्गीत- नाटक- अकादमी इत्यस्या आर्थिकसहयोगेन, संस्कृताध्ययनकेद्रं पालिताणाद्वारा विजुअल आर्ट्स निर्मितं डॉ. पङ्कज त्रिवेदिना लिखितम् अमरसिंह दरोगा इत्ययेन विद्योत्तमास्वयंवरम् इति संस्कृतनाटकम् मञ्चितम्।नाटकम् इदं सम्पूर्णतया संस्कृतभाषया प्रस्तुतम्। संस्कृताध्ययनकेन्द्रस्य छात्राभिः कृतम्। कार्यक्रमे अस्मिन् गुजरात भाजपा अध्यक्षः महेन्द्रसिंह सरवैया पालिताणा धारासभ्यश्री भीखा भाई बारैया, भूपेन्द्रसिंह गोहिल नगरपालिकाप्रमुखः, अमित भाई प्रबतानी नगरपालिका उपप्रमुखः, डॉ. पङ्कज त्रिवेदी उपाध्यक्षः गुजरातराज्य- संस्कृतबोर्ड मयूर सिंह सर्वैया प्रमुखश्री एडुक्केशन सोसायटी, नरेन्द्र पण्डया सेक्रेट्री एजु. सोसायटी महिला महाविद्यालय पालिताणा प्राध्यापकाः, घनश्याम भाई सी एम विद्यालय प्राचार्यः, गिरि भाई, जिग्रेश भाई कन्या विद्यालयः, आर. वी. बाग्रेचा अनुस्नातककेंद्रस्य प्राध्यापकगणः छात्राश्च समुस्थिताः आसन्। सम्पूर्णमपि नाटकम् संस्कृते आसीत्। मञ्चसञ्चालनं कृपाली कामलिया कृतवती। दीपप्रागट्यम् अभूत्, प्रार्थना, नाटकस्य च भूमिकापरिचयादिकं प्रकाश व्यवस्थां च जिग्रेश व्यासमहोदयः कृतवान्। नाटके सूत्रधाररूपेण वघासिया मेंसी खसिया दर्शना आस्ताम्।

**पात्र परिचयः**-
विद्योत्तमा- चौहान दर्शना ,कालिदासः:- दया गोहिल ,पण्डितः:- मेंसी वघासिया राजकुमाराः:- गोस्वामी तन्वी, जलु मिरल, वाला निधिः, सुजान चूडेसरा द्वारपालः:- सिमरन राठौड़ महेन्दी राठोड, राजा विक्रमादित्यः:- चौहान निशा। राज नर्तकी- श्रीनिधिः। सखि- ध्रुवी बारैया। सङ्गीतसंयोजनम्- डॉ. हरेश महेता, सानिया गाहा, मानसी चूडासमा, अमरसिंहः।प्रकाशव्यवस्था- दिलशाद, प्राञ्जल मकवाणा। नेपथ्ये- जय जानी, सरोज मकवाणा, राठौड़ प्रियंका, मेर वैशाली, कृपाली कामलिया।
नाटकम् इदं पी. एन. आर. शाह महिला महाविद्यालय, पालिताना इत्यस्य सभागारे अभूत् ।

# संघर्षशीलस्वप्नस्य सुखदयात्रा- उत्तराखण्ड- संस्कृत- अकादम्याः उत्तराखण्ड- संस्कृत- संस्थान- पर्यन्तयात्रा गौरवक्षणाय सधन्यवादभावाक्षराणि डॉ. नरेन्द्रपाण्डेयवर्यस्य



**हिमसंस्कृतवार्ताः-** कुलदीपमैन्दोला।उत्तराखण्डसंस्कृत- अकादम्याः उत्तराखण्ड- संस्कृत- संस्थान- पर्यन्तं संघर्षशीलस्वप्नस्य सुखदयात्राविषये पूर्वप्रदेश- संघटनमन्त्री, (संस्कृत भारती- उत्तराखण्ड) डॉ. नरेन्द्रपाण्डेयवर्यः भावाक्षराणि प्रकटयति यत्- मित्राणि! यत् कश्चित् वृक्षः रोप्यते, नितान्तं न आवश्यकं यत् तस्य फलानां स्वादः स्वजीवनकाले एव अनुभूयेत। तथैव यत् किञ्चिद् संघटनं वा संस्था वा निर्मीयते, न आवश्यकं यत् तस्य लक्ष्यपूर्तिः अथवा कार्यसिद्धिः कर्तृभिः स्वनेत्राभ्यां एव दृष्टा भवेत्। उदाहरणरूपेण- जनसंघस्य संस्थापकः स्व. डॉ. श्यामाप्रसाद मुखर्जी महोदयः कश्मीरविषये राष्ट्रहिताय बलिदानं कृतवान्, किन्तु “एकस्मिन् देशे द्वे विधाने, द्वौ प्रधानौ, द्वे चिह्ने” इति भेदस्य नाशं स्वनेत्राभ्यां द्रष्टुं नालभत। तथैव श्रीराममन्दिरस्य पुनर्निर्माणार्थम् आजीवनं संघर्षरतः स्व. अशोकसिंघलमहोदयः अपि तस्य सुखदं दृश्यं स्वजीवने नाद्राक्षीत्। एतेषु इव असंख्येषु उदाहरणेषु पवित्रभावनया ध्येयनिष्ठया च आरब्धानि कार्याणि कालान्तरेण अवश्यमेव शुभां परिणतिं प्राप्नुवन्ति। प्रसङ्गः अस्ति यत् उत्तराखण्ड-सर्वकारेण “उत्तराखण्ड- संस्कृत- अकादमी” इति नाम परिवर्त्य “उत्तराखण्ड- संस्कृत-संस्थानम्” इति कृतम्। एषः मार्गः, एषा च सङ्घर्षयात्रा वयं संवत्सरे २०१० मध्ये, संस्कृतस्य उत्तराखण्डस्य द्वितीय- राजभाषा- घोषणानन्तरमेव, अग्रिम-लक्ष्यरूपेण आरब्धवन्तः। तस्मिन् काले अकादम्याः सचिवः स्व. डॉ. बुद्धदेवशर्ममहोदयः, उपाध्यक्षः च प्रो. महावीर अग्रवालमहोदयः आस्ताम्। ये च वरिष्ठः संघप्रचारकः स्व. ओमप्रकाशमहोदयः, यः लखनऊतः प्रत्येकप्रवासे आगत्य हरिद्वारे संघकार्यालये अस्मान् उपाविश्य अस्य कार्यस्य विषये अनुशासनं कुर्वन् समयसीमां पृच्छति स्म। एते त्रयः अद्य अस्माकं मध्ये न सन्ति। किन्तु तेषां अभिलाषा अद्य पूर्णा जाता। अकादमी अद्य “संस्थानम्” इति नाम्ना विख्याता भविष्यति। मित्राणि! मम स्मृतौ अद्यापि सः कालखण्डः अस्ति, यदा संस्कृतं उत्तराखण्डस्य द्वितीया राजभाषा कर्तुं वयं बहून् कार्यक्रमान् आन्दोलनानि च अकरवाम। पत्रिकाः वितरिताः, सभाः, सम्मेलनानि सर्वं लिखितुं न शक्यते। भवत्सु अनेके अस्यां यात्रायां सहभागीभूत्वा संघर्षं कृतवन्तः। विंशतिवर्षपूर्वं सः समयः अपि स्मर्यते, यदा उत्तराखण्डस्य प्रत्येकं जनपदे सम्मेलनानि आयोजितानि, तेषां कृते मासान् यावत् बसयानैः सम्पूर्णस्य उत्तराखण्डस्य प्रवासः कृतः। अतः अस्याः गाथायाः अत्रैव विरामः। एतस्य विलम्बितस्य पुण्यकार्यस्य सम्पादनाय सर्वकाराय हार्दिक- अभिनन्दनानि। सजगाः तिष्ठन्तु, संघटिताः भवन्तु, प्रमाणिकतया ध्येयनिष्ठया च कार्यं कुर्वन्तु। फलम् अवश्यमेव लभ्यते। अद्य न चेत् श्वः। नूनम् संघर्षरतानाम् भगीरथप्रयासः साफल्यमवाप्नोत् अकस्माकम् कृते गौरवास्पदम्।



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

## संस्कृतभाषा संरक्षणीया लोके

"भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा" इति सूक्तानुसारं भारतदेशस्य परिचयः संस्कृतसंस्कृत्योः कारणतः सन्तिष्ठमानो वर्तते, अर्थात् भारतगौरवस्य कारणं हि संस्कृतभाषा, भारतीयसंस्कृतिः च ।स्वदेशस्य, स्वस्थानस्य, स्वजनस्य भाषायाः शिक्षणं प्रत्येकं जनस्य एकं सामाजिकं दायित्वम् । संस्कृतभाषा भारतीयानां स्वकीयाभाषा, पितृभिः प्रदत्ता भाषा, जनभाषा वा वर्तते । समाजस्य अधिकांशजनाः यदि दैनन्दिकजीवने अपि इतरभाषां वक्तुम् आरभन्ते, तर्हि संस्कृतभाषा-वक्तृणां सङ्ख्या शनैः न्यूनतां गच्छेदिति तु स्वाभाविकमेव । यदा संस्कृतवक्तृणां सङ्ख्या कालक्रमेण न्यूनतां, शून्यतां वा गच्छेत् तदा भाषेयं मृतभाषारूपेण परिगणिता भवेत् । तथैव संस्कृतभाषया रचितानां समस्तसाहित्यानां चिह्नमपि लोकतः मार्जितं भवेत् । तस्मात् संस्कृतस्य सर्वाङ्गीणोन्नत्या सह समाजस्य प्रत्येकं जनस्य एकं नैतिकदायित्वं संलग्नं स्यात्, अत एव भारतीयसनातनिभिः संस्कृतसंरक्षणसम्बद्धस्य स्वदायित्वपालनस्य अत्यन्तमेव आवश्यकता अस्ति, अन्यथा भारतीयता, हिन्दुत्वं, संस्कृतिः, सनातन-परम्परा, यज्ञः, संस्कारः इत्यादिकं सर्वं विनश्येत् इत्यत्र न सन्देहः, कारणं संस्कृतं हि एतस्य सर्वस्य धारकं वाहकं चेति किञ्चन चिन्तनम् ।



## वार्ता-संवादः

हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य एकां वार्तां श्रुत्वा मया आश्चर्यम् अनुभूतम्। एकया तन्त्रज्ञया निवेदितं यत् तस्याः भ्रात्रा 'ग्रोक' (Grok) नाम्न्याः कृत्रिमबुद्धेः साहाय्येन वित्त- आपणे शीघ्रं धनम् अर्जितम् इति।

**नन्दिनी-** बाढम्, तन्त्रज्ञानं तु वर्धमानम् अस्ति। अथ अन्या वार्ता चीन-देशात् आगता। तत्र एकेन शुनकेन प्रतिदिनं स्व-स्वामिनः प्रतीक्षा क्रियते।

**काव्या-** अहो मर्मस्पर्शी विषयः। मया अपि पठितं यत् सः स्वामी मृतः, किन्तु एतत् तेन शुनकेन न ज्ञातम्। अतः अद्यापि तेन स्वामिनः पन्थाः अवलोक्यते।

**नन्दिनी-** पशूनां निश्छल-प्रेम तु अनुपमम्। इदानीं भाग्यनगरात् एका आनन्ददायिनी वार्ता अस्ति। तत्र एकेन नरेण स्व-पाचकस्य सप्तिततमं जन्मदिनं महता उत्साहेन आचरितम्।

**काव्या-** एतत् श्रुत्वा मनः प्रसीदति। बहुत्र सेवकाः उपेक्षिताः भवन्ति। किन्तु अनेन नरेण दर्शितं यत् औदार्यं श्रेष्ठम्। अतः सः जनैः प्रशंसितः।

**नन्दिनी-** सत्यम्, तादृशम् औदार्यं तु दुर्लभम्। अन्यत्र चीनदेशे एकया द्व्यशीति-वर्षीयया वृद्धया आश्चर्यं कृतम्। तया नियन्त्रित-विमानस्य साधनेन तथा च अन्तर्जाल-प्रसारेण कृषि-फलानि विक्रीतानि।

काव्या- अहो! प्रायः वृद्धैः तन्त्रज्ञानात् भीयते। किन्तु अनया महिलया प्रमाणितं यत् वयः केवलम् एका सङ्ख्या एव। तया नूतना विद्या गृहीता।



-डॉ. विदुषी अग्रवाल

## परिवारः अस्माकं संस्कारशाला

कुटुम्बः अस्माकं संस्काराणां पाठशाला अस्ति। कुटुम्बः एव तस्य शिक्षाकेन्द्रम् अस्ति।

ओटीटी मञ्चेषु किं किं प्रदर्श्यते? सञ्चारमाध्यमेषु यत् किञ्चित् आगच्छति, तत् "संस्काराणां कृते किं हितकरं भविष्यति" इति चिन्तनम् आवश्यकम्। रामायणं महाभारतं च सम्पूर्णे विश्वे जनाः पठन्ति, ताभ्यां प्रेरिताः अपि भवन्ति; रामायणे परिवारस्य प्रत्येकं सदस्यस्य आदर्शव्यवहारः कथं भवेत्, इति चित्रितम् अस्ति। महाभारते कलहः किमर्थं भवति, सः कथं निवारणीयं, समयेन निर्णयं कथं करणीयः, यदि न क्रियते तर्हि कति भीषणाः परिणामाः भवितुं शक्नुवन्ति, भीषण-परिस्थितौ अपि स्वस्य कर्तव्यस्य धर्मस्य च पालनं कथं करणीयः, इति शिक्षा अपि लभ्यते।

अस्माकं समाजे वयं मातापितरौ गृहे एव स्थापयामः। यदि तौ रुग्णौ स्तः, शय्यागतौ स्तः, सर्वं शौचादिकं तत्रैव करणीयं भवति, तथापि वयं तयोः सेवां कुर्मः। परिवारस्य कश्चित् सदस्यः तु स्ववृत्तिम् अपि त्यजति।

एषः अस्माकं परिवारः, एषः भारतीयः परिवारः। 'सम्पूर्णविश्वस्य सम्मुखे परिवारः कीदृशः भवेत्' इति उदाहरणं प्रस्तौतुम् एषा हास्यलघुनाटिका अस्ति।

## "विनोदकणिका"

कस्मिंश्चित् नगरे 'New Husbands' {पतिः चयनार्थम्} इति भण्डारः उद्घाटितः। षड् अट्टयुक्त भण्डारः आसीत्। अट्टस्य प्रत्येकस्तरे पत्युः चयनस्य व्यवस्था आसीत्। प्रथमतलात् परं गत्वा उत्तमः पतिः प्राप्तुं सम्भावना आसीत्। प्रत्येकं तलभागे भर्तुः विशेषताः लिखिताः आसन्। तस्मिन् भण्डारे एका युवती पतिं चिन्वितुम् आगतवती।

**प्रथमे तले-** एतेषां पुरुषाणां वृत्तिः अस्ति।

**द्वितीये तले-** एतेषां पुरुषाणां समीपे वृत्तिरपि अस्ति, प्रेम अपि अस्ति। **तृतीये तले-** एतेषां पुरुषाणां वृत्तिरस्ति, प्रेम अपि अस्ति, अत्यंत रूपवान् अपि अस्ति। **चतुर्थे तले-** एतेषां पुरुषाणां वृत्तिः अस्ति, प्रेम अपि अस्ति, रूपवान् अपि अस्ति, गृहकार्यं कर्तुम् अपि जानाति। **पञ्चमे तले-** उपर्युक्तैः सर्वैः गुणैः सह इमे पुरुषाः रोमांटिक इति अपि सन्ति।युवती अतीव प्रसन्ना अभवत्। अधुना षष्ठतलम् अपि पश्यामि। इति चिन्तयित्वा-

**षष्ठे तले-** भवती अस्मिन् तले आगच्छन्ती ३१४५६०१२ क्रमाङ्कस्य महिला अस्ति। अस्मिन् तले कोऽपि पुरुषः नास्ति। स्त्रियाः तृप्तिः न भवितुम् अर्हति। भण्डारम् आगमनस्य कृते धन्यवादः।

उपर्युक्तस्य भण्डारस्य स्वामिना मार्गस्य पारम् अन्यं भण्डारम् उद्घटितम्। नाम आसीत् 'New Wifes' {पत्नी चयनार्थम्}। प्रथमतलस्य उपरि लिखितम् अस्ति। एताः स्त्रियः पुरुषान् शृण्वन्ति। द्वितीय- तृतीय- चतुर्थ- पञ्चम- षष्ठ तलेषु कदापि न कश्चित् पुरुषः गतः।

डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्

## पाठकसन्देशः

अमनदीपमहोदयः, सादरं नमस्ते !

कच्छ (गुजरात) मण्डले सूर्यस्य प्रथमकिरणानाम् अपि प्रादुर्भावात् पूर्वं प्रतिदिनं "हिमसंस्कृतवार्ता" इति अङ्कीयपत्रं प्राप्नोमि। सूर्योदयः "हिमसंस्कृतवार्ता" पत्रप्राप्तिः च युगपत् भवति इव । अहो, रविवासरेषु अपि—अवकाशदिनेषु—एतत् "हिंसंस्कृतवार्ता" इति अङ्कीयपत्रं अव्यवधानं प्राप्नोमि। इदं "हिमसंस्कृतवार्ता" इति वृत्तपत्रं सूर्योदयात् पूर्वं वितरितं भवति येन अनेकेषु विद्यालयेषु पठितुं शक्यते तथा च सम्पूर्णं वातावरणं संस्कृतं भवति इति ज्ञात्वा अहं प्रसन्नः अभवम्। "हिमसंस्कृतवार्ता" डिजिटल वृत्तपत्रं सदस्यानां सम्पूर्णदलस्य प्रतिबद्धतायाः कृते अभिनन्दनानि अभिनन्दनानि च! 🌸

वेदरुचि रामचन्द्रः आचार्यः आदिपुर (कच्छ, गुजरात)

## हास्यकणिका

### पति-पत्न्योः मध्ये हासपरिहासम्

पत्नी (कृष्णवर्णीयसूत्रं पत्युः हस्तस्य उपरि बध्नाति तदा वदिष्यति) अघोरीबाबातः अहं भवतः कृते कृष्णवर्णीयसूत्रम् आनीतवती। भवन्तं प्रेतनी-पिशाचिनीतः सुरक्षितं करिष्यति।

पतिः 😱 😨 - अहं भवत्या विना न स्थातुं शक्नोमि 👿 👿 👿 👿 👿 👿 👿 👿

पत्नी 😳 😳 🙄 😳 😳 😳 😳

-डॉ. विदुषी अग्रवालः

